



Scanned with CamScanner

ISSN : 2229-5577

# सागरिका

## त्रैमासिकी संस्कृतशोधपत्रिका

अङ्क 49/3,4 - 50/1,2 विक्रमसंवत् 2078 (2021 ई.)
नवचत्वारिंशत्वर्षेतृतीयचतुर्थः-पंचाशत्वर्षेप्रथमद्वितीयोऽङ्कः

**संस्थापक-संपादकः**
स्व. रामजी उपाध्यायः

**प्रधानसम्पादकः**
राधावल्लभत्रिपाठी

**सम्पादकः**
आनन्दप्रकाशत्रिपाठी

**प्रबन्धसम्पादकः**
शशिकुमारसिंहः

**सम्पादकमण्डलम्**
नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

**सागरिकासमितिः**
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

Scanned with CamScanner

ISSN : 2229-5577 UGC Approved JN. No.-42268

# सागरिका

## SAGARIKA

Quarterly Research Journal in Sanskrit (Peer Reviwed)
Vol. 49/3,4 - 50/1,2
Four Issues Every Year-June-Sep.-Dec.-March
अङ्कप्रकाशनं प्रतिवर्षम् आषाढ-आश्विन-पौष-चैत्रमासेषु

**परामर्शदात्री समितिः**

1. प्रो. शशिप्रभाकुमारः
2. प्रो. अभिराजराजेन्द्रमिश्रः
3. डॉ. बलरामशुक्लः
4. डॉ. रमाकांतशुक्लः
5. प्रो. पी.के. मिश्रः

**पत्रव्यवहारसङ्केतः**

**प्रो. आनन्दप्रकाशत्रिपाठी**
अध्यक्षः, संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)
दूरभाष-फैक्स : 07582-264366
Email : sanskritsagar1946@gmail.com

**प्रकाशिका – सागरिकासमितिः**
संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**सदस्यताशुल्कम्**
वार्षिकम् - 100 रुप्यकाणि, आजीवनम् प्रतिव्यक्ति - 1000 रुप्यकाणि, आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि

**आवरणं शब्दसज्जा च**
**अमन प्रकाशन,** नमकमंडी, कटरा, सागर (म.प्र.)
**मोबा.** : 9826434225

Scanned with CamScanner

# अनुक्रमः


| | | | |
|---|---|---|---|
| 1. | वैदिकवाङ्मये पर्यावरणचिन्तनम् | - *रामसुमेरयादवः* | *09* |
| 2. | वेदेषु मानवाधिकारः सामाजिकसद्भावना च | - *प्रभातकुमारसिंहः* | *18* |
| 3. | शातपथानि सुभाषितानि | - *किरण आर्या* | *23* |
| 4. | मनुस्मृत्यनुसारेण राजधर्मस्य वैशिष्ट्यम् | - *सञ्जयकुमारः* | *30* |
| 5. | मनुस्मृतौ राष्ट्ररक्षणचिन्तनम् | - *नौनिहालगौतमः* | *37* |
| 6. | रामकथायाः लोकचैतन्यं राजशेखरश्च | - *पूर्णचन्द्र उपाध्यायः* | *44* |
| 7. | शिशुपालवधस्य काव्यशास्त्रीयं समीक्षणम् | - *बाबूलालः मीना* | *52* |
| 8. | कादम्बरी कथायां जीवजन्तूनामवदानम् | - *राघवेन्द्रशर्मा* | *58* |
| 9. | लब्ध्वंवधूपदम् | - *रामहेतगौतमः* | *66* |
| 10. | विद्या प्रादुर्भवित्तेषाम् | - *दयानिधिशर्मा* | *71* |
| 11. | काव्येषु नाटकस्य रमणीयता | - *आशासिंह रावत* | *76* |
| 12. | संस्कृतसाहित्ये काव्यभाषास्वरूप-विवेचनम् | - *हेमन्तशर्मा* | *85* |
| 13. | काव्यशास्त्रे वागर्थविमर्शः | - *रहसबिहारीद्विवेदी* | *94* |
| 14. | संस्कृत-काव्यशास्त्रे वक्रोक्ति-विमर्शः | - *तरुणकुमारशर्मा* | *101* |
| 15. | शब्दार्थयोः सम्बन्धविचारः | - *सूरेरामतिरुमलरेड्डिः* | *107* |
| 16. | भारतस्यैकताधारं सीमावर्ति तीर्थम् | - *शशिकुमारसिंहः* | *112* |
| 17. | विशिष्टाद्वैतदर्शनस्यस्वरूपम् | - *अखिलेशकुमारमिश्रः* | *117* |
| 18. | मानवीसंस्कृते बालोपन्यासः | - *पूर्णचन्द्रउपाध्यायः* | *122* |
| 19. | अनुवाक् | - *नौनिहालगौतमः* | *124* |
| ● | लेखकपरिचयः | | *127* |


Scanned with CamScanner

# 5

# मनुस्मृतौ राष्ट्ररक्षणचिन्तनम्

***नौनिहालगौतमः***

वेदेषु बहुविधं ज्ञानं निबद्धमस्ति। परवर्तिशास्त्राणि वेदमेवमनुसरन्ति। परवर्तिशास्त्रेषु प्रसिद्धमस्ति धर्मशास्त्रम्। धर्मशास्त्रं स्मृतिर्वा वेदार्थमेवानुसरति। रघुवंशे महाकविः कालिदास आह- श्रुतेरिवार्थं स्मृतिरन्वगच्छत्। राजेशखरोऽपि एवं कथयति- अष्टादशैव श्रुत्यर्थस्मरणात् स्मृतयः। मनुस्तु धर्मशास्त्रमेव स्मृतिं निरूपयति-'धर्मशास्त्रं तु वै स्मृतिः'[1]

स्मृतिषु मुख्यं स्थानं भजति मनुस्मृतिः। मनुस्मृतौ यथा धर्मशास्त्रीय-विषयाः वर्णिताः सन्ति तथैव राष्ट्ररक्षणचिन्तनमपि सविस्तरं निरूपितमस्ति। मनुस्मृतौ राज्यस्य सप्त अङ्गानि उक्तानि सन्ति। तानि च- राजा, मन्त्री, पुरं, राष्ट्रं, कोशः, दण्डः, मित्रं च सन्ति। तद्यथा-

**स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा।**
**सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते।।**[2]

राज्यस्य राष्ट्रस्य वा एतेषां सप्ताङ्गानां सविस्तरं विवेचनं सिद्ध्यति यत् मनुस्मृतौ राष्ट्ररक्षणस्य उत्कृष्टं चिन्तनं विद्यते। राष्ट्रस्य सुरक्षायै उन्नत्यै च एतानि अङ्गानि सुदृढानि भवेयुः।

एतेषाम् अङ्गानां का अर्हता, कानि कार्याणि, का आवश्यकता, किं च वैशिष्ट्यमिति सर्वं मनुस्मृतौ सविस्तरं निरूपितमस्ति। एतेषां विषये विवेचनमत्र क्रमशः प्रस्तूयते।

**(1) राजा स्वामी वा -** राजा स्वामी वा प्रजानां रक्षायै भवति। प्रत्येकं क्षत्रियस्यापि कर्तव्यमस्ति प्रजानां रक्षणम्। तद्यथा-



Scanned with CamScanner

# 19

## ग्रन्थसमीक्षणम्

### अनुवाक्

*नौनिहालगौतमः*

लेखकः आचार्यः कृष्णकान्तचतुर्वेदी जबलपुरविश्वविद्यालयस्य पूर्व-संस्कृतविभागाध्यक्षः। ग्रन्थस्य नामकरणमेकस्य निबन्धस्य 'अनुवाक्' इत्यस्य आधारेण कृतम्। ग्रन्थे सङ्कलितनिबन्धेषु विषयवैविध्यमस्ति। ग्रन्थोऽयं भारतस्य प्राचीनज्ञानानां, परम्पराणां, साहित्यिक वैभवस्य, दार्शनिकोदात्ततायाः परिवेशस्य च संक्षेपेण निदर्शनं प्रस्तौति। प्राचीनविवरणानां संस्कृते विद्यमानत्वाद् ग्रन्थस्य तथ्यानि संस्कृतमाश्रयन्ते। लेखकेन एते निबन्धाः स्वकार्यक्षेत्राज्जातस्य साक्षात् अनुभवस्याधारेण विरचिताः येन विषयवस्तुनः प्रामाणिकता विश्वसनीया जाता। लेखकस्य मन्तव्यं यत् प्राचीनभारतीयज्ञानं वर्तमानेऽपि प्रासंगिकमुपयोगि चास्ति, उदारदृष्ट्या तदनुशीलनीयम्। लेखको रूढिं नाश्रयते, अपितु परम्पराः प्रगतिवादिचिन्तकरूपेण निरूपयति।

लेखकः समसामयिकसमस्यानां निराकरणाय पारम्परिकज्ञानस्योपयोगं कर्तुं वाञ्छति। प्रत्येकं निबन्धस्य 4-6 पंक्तिषु निष्कर्षः प्रदत्तः यो निबन्धस्यावबोधे नितान्तमुपयोगी अस्ति।

कालिदासमवलम्ब्य 3 निबन्धाः, राजशेखरमाश्रित्यैको निबन्धः, भारतीय-संस्कृतिमाश्रित्य 3 निबन्धाः सन्ति। लेखकः संस्कृतिं संस्कृताश्रितां मनुते, नैतिकताविहीनतां यान्तं देशं प्रति चिन्तां प्रकटयति। भारतीयसंस्कृतिः कुलजातिधनविद्यापेक्षया चरित्रं श्रेयस्करं स्वीकरोति। विभिन्नसंस्कृतीनां श्रेष्ठोपादानैः निर्मिता सशक्ता भारतीयसंस्कृतिः विपरीतपरिस्थितिष्वपि सुस्थिरा वर्तते। भारतीयसंस्कृतिः सहिष्णुतासमन्वययोः उदाहरणमस्ति। ईको-नारसिसयोः



ग्रीकमिथकस्योल्लेखः लेखकस्य अध्ययनक्षेत्रस्य व्यापकतायाः परिचायकः। 'संस्कार' निबन्धः जीवने मूल्यानां महत्त्वं निरूपयन् मानवोदात्तीकरणाय संस्काराणामनिवार्यत्वं ज्ञापयति। वागर्थयोः भारतीय परम्परायां मान्यतां निरूपयति निबन्धः 'वागर्थ'इति। यथा - 'प्रयत्न करने पर भी उस (वाक्) का सर्वांग निरूपण सम्भव नहीं है। यही उसके विमर्श का वैशिष्ट्य है और सीमा भी।' (अनुवाक् पृ. 69)

दशमो निबन्धः - 'अनुवाक्'। अनुवाक् अर्थात् वाक्तत्त्वस्यानुगमनम्। विगतसहस्राब्दीनां विवरणं वाचि संरक्षितमस्ति। तत् श्रेयसः प्रेयसश्च संस्करणानां आश्रयाभिलेखः। पुरातनीयविभिन्नमहत्त्वपूर्णोपलब्धयः वाक्तत्त्वस्यानुरणनद्वारा प्राप्ताः। 'राधाभावसूत्रपीठिका' इतिनिबन्धः स्वामिदेवमित्रनन्दगिरिविरचितस्य राधाभावसूत्रग्रन्थस्य (108 सूत्राणि) परिचयात्मक पीठिकास्ति। 'भारतीय सौन्दर्यशास्त्र तथा आधुनिक बोध' निबन्धे वेदादारभ्य आचार्यराधावल्लभ त्रिपाठिपर्यन्तं भारतीयपरम्परायां कृतायाः सौन्दर्यविषयकचर्चायाः दिङ्मात्रेण प्रस्तुतिरस्ति। 'लेखन कला का विकास'निबन्धः संक्षेपेण पाण्डुलिपिविज्ञान-स्यास्वादं कारयति। 'काल की अवधारणा' निबन्धे वेदे प्राप्तस्य कालस्वरूपस्य, कालप्रकाराणां, कालगणनायाः, ज्योतिषस्य, संगीतस्य, अनुष्ठानादिभिः कालसंबंधस्य, कालमापकघटीनाञ्चोल्लेखोऽस्ति। 'काश्मीर शैव आगम' निबन्धे शैव-शक्त-वैष्णव-बौद्ध-जैनागमानामुल्लेखं कुर्वन् लेखकः कश्मीरे प्रचारितानां सर्वात्मकभावाश्रितानां षडागमानां वर्णनं कुरुते। 'महायान और वैष्णवागम में भक्ति' निबन्धे महायान-वैष्णवागमयोः परस्परं समानतायाः, प्रभावस्य, समन्वयस्य ऐक्यस्य च निरूपणे लेखकस्य प्रवृत्तिरस्ति। 'मध्व-वेदान्त में पर-तत्त्व विष्णु' निबन्धे दार्शनिक परम्पराणां पक्ष-विपक्षान् तर्कपूर्णरीत्या स्थापयन् लेखको मध्ववेदान्तस्य सिद्धान्तं भारतीयदर्शनप्रस्थानस्य महत्त्वपूर्णामुपलब्धिं स्वीकरोति। 'संस्कृत साहित्य में चेदिदेश और त्रिपुरी' निबन्ध एतयोः नगर्योः परिचयः, संस्कृति-सभ्यता-स्थापनायां योगदानं च प्रस्तौति। ग्रन्थस्य लघुतमे 'अग्निपुराण' निबन्धे ग्रन्थकारः पुराणमिदं विभिन्नविषयाणां ज्ञानमद् विश्वकोषं कथयति। 'वराहकथा' निबन्धो वराहावतारकथाया विकासक्रमं महत्त्वं च प्रकटीकरोति। जबलपुरवासी लेखको जनजातीनां संस्कृति-परम्परा-धार्मिक विश्वास-क्षेत्रैतिहासिक-तथ्य-लोककथानां प्रत्यक्षं ज्ञानं दधाति। ज्ञानमिदं लेखकेन 'नर्मदा



Scanned with CamScanner